भाष

CHETANA
International Journal of Education (CIJE)

Peer Reviewed/Refereed Journal
ISSN : 2455-8279 (E)/2231-3613 (P)

Impact Factor
SJIF 2024 - 8.445



Prof. A.P. Sharma
Founder Editor, CIJE
(25.12.1932 - 09.01.2019)

# संस्कृतभाषायाः हाड़ौतीभाषायाम् प्रभावः

श्रीरामशर्मा
*अनुसन्धाता, आचार्यः, शिक्षाचार्यःनेट-जे.आर.एफ*
प्रो.कमलचन्द्रयोगी
*मार्गनिर्देशकः*
*आचार्यः व्याकरणशास्त्रविभागः केंद्रीय संस्कृत विश्वविद्यालय जयपुरपरिसरः, जयपुरम्*
*Email*– shriramsharma1987@gmail.com M*obile*- 9887574206

……………………………………………………………………….
*First draft received: 05.04.2025, Reviewed: 18.04.2025*
*Final proof received: 11.05.2025, Accepted: 28.05.2025*

**सार संक्षेप**

भारतदेशे विविधाः जनभाषाः वर्तन्ते। तासु हाड़ौतीभाषा अपि प्रमुखा एव अस्ति। हाड़ौतीभाषा राजस्थानराज्यस्य दक्षिणपूर्वे विद्यमाना एका प्रमुखा अपभ्रंशोत्पन्ना प्रादेशिकभाषा अस्ति। एषा भाषा मुख्यतः कोटा, बूंदी, झालावाड़, बारां इत्यादिषु जनपदेषु प्रयुज्यते।हाड़ौतीभाषा राजस्थानीभाषायाः उपभाषा अस्ति, या भारोपीयपरिवारस्य आर्यशाखायाः अन्तर्गतं अस्ति।[1]/

**मुख्य शब्द** : *जनभाषाः, प्रादेशिकभाषा आदि.*

**प्रस्तावना**

भारतदेशे विविधाः जनभाषाः वर्तन्ते। तासु हाड़ौतीभाषा अपि प्रमुखा एव अस्ति। हाड़ौतीभाषा राजस्थानराज्यस्य दक्षिणपूर्वे विद्यमाना एका प्रमुखा अपभ्रंशोत्पन्ना प्रादेशिकभाषा अस्ति। एषा भाषा मुख्यतः कोटा, बूंदी, झालावाड़, बारां इत्यादिषु जनपदेषु प्रयुज्यते।हाड़ौतीभाषा राजस्थानीभाषायाः उपभाषा अस्ति, या भारोपीयपरिवारस्य आर्यशाखायाः अन्तर्गतं अस्ति।

हाड़ौतीभाषायाः साहित्यं मौखिकपरम्परायामेव आरब्धम्। प्राचीनकाले गीतकथाः, लोकप्रबन्धाः, जनश्रुतयः च हाड़ौतीभाषायां सन्तः। स्त्रीणां द्वारा गीयमानानि 'बिंदोरी गीतानि', 'सोजणी गीतानि' च विशेषं प्रचलिता आसन्। अनेन साहित्येन तत्रस्थितजनानां आचारविचाराः, धर्मनिष्ठा, सामाजिकजीवनम् च प्रकाशं गच्छन्ति।

विंशतिशतके हाड़ौतीभाषायामपि लिखितरूपेण साहित्यं विकसितं जातम्। नूतनकवयः, लेखकाश्च हाड़ौतीभाषायां नाटकानि, निबन्धाः, कविताः, उपन्यासाः च रचयन्ति। श्री चंद्रप्रकाश 'जोशी', श्री मांगीलाल व्यास, श्री रामचरण डांगी इत्यादयः प्रमुखाः लेखकाः सन्ति।

हाड़ौतीभाषायाः लोकसाहित्यं अतीव समृद्धम् अस्ति। लोककथाः यथा-ढोला-मरू, कुरजा, गोगाजी की कथा च अत्र प्रसिद्धाः सन्ति। एतेषां माध्यमेन जनमानसस्य आदर्शाः, नैतिकताः च सम्प्रेष्यन्ते।

एषा भाषा सामान्यजनानां संवादोपयोगाय प्रयुज्यते, ग्राम्यजीवने अत्यन्तं प्रचलिता अस्ति। यद्यपि एषा भाषा लेखनीरूपेण अल्पं प्रयोगं लभते, तथापि लोकगीतैः, जनश्रुतिभिः, तथा मौखिकपरंपरया एषा भाषा जीवति।

हाड़ौतीभाषायाः मूलं संस्कृतभाषायामेव दृश्यते। यथा हिन्दी, गुजराती, मराठी, बंगाली इत्यादयः भाषाः संस्कृतनिष्पन्नाः, तथा हाड़ौतीभाषा अपि संस्कृतजन्या एव। अस्य भाषायाः विकासक्रमे प्राकृतम्, अपभ्रंशः, ततः हाड़ौती इति क्रमः दृश्यते।

न केवल शब्दरूपे, अपि तु व्याकरणसंरचना अपि संस्कृतसदृशा अस्ति। लिङ्गम्, वचनम्, कारकप्रयोगः, धातुरूपविकल्पाः च हाड़ौतीभाषायामपि दृश्यन्ते।

**शब्दावल्यां संस्कृतप्रभावः**

हाड़ौतीभाषायां बहवः शब्दाः प्रत्यक्षतः संस्कृतभाषात् आगतानि सन्ति। यथा —

संस्कृतम्: जलम्, हाड़ौती: जल

संस्कृतम्: अग्निः, हाड़ौती: अगणी

संस्कृतम्: माता, हाड़ौती: मायड़

संस्कृतम्: गृहः, हाड़ौती: घर

**व्याकरणे संस्कृतरूपसाम्यता**

हाड़ौतीभाषायामपि विभक्त्याः, लिङ्गानुसारं पदरचनाः, कालप्रयोगाः च संस्कृतव्याकरणस्य अंशान् अनुगच्छन्ति। उदाहरणतयाः

राम आयो' (रामः आगतः)

'सीता बोल्यी' (सीता उक्तवती)

'हम जासां' (वयं गच्छामः)

**धातुव्यवहारे संस्कृतधातुप्रभावः**

हाड़ौतीभाषायां प्रयुज्यमानाः धातवः बहवः संस्कृतधातुभ्यः एव उद्भूताः। यथाः

खा (अश्नाति),

जा (गच्छति),

लिख (लिखति),

दे (ददाति)।

**भाषिकं स्वरूपम्** - संस्कृतम् – संस्कृतं लिपिपरिष्कृतं, व्याकरणशास्त्राधारितं च भाषा अस्ति। अस्य भाषायाः पाणिनिकृतं 'अष्टाध्यायी' इत्येतत् प्रमुखं व्याकरणम् अस्ति।

हाड़ौती एका अपभ्रंशशाखा, या अपि मध्यकालीनसंस्कृतव्याकरणपरम्परायाः छायाम् अनुसरति, किन्तु अधिकं लोकप्रचलिता, सरलव्यवहारिकाश्रिताश्च।

**साहित्यरूपाणि**

संस्कृतसाहित्ये – वेदाः, उपनिषत्, महाभारत-रामायणयोः इतिवृत्तम्, कालिदासस्य काव्यानि, भास-शूद्रक-भवभूतिदीनां नाटकानि च प्रसिद्धानि।

**विषयवस्तु**

संस्कृतम् – दर्शन, धर्म, नीति, श्रृंगार, वीररस, अध्यात्म इत्यादयः प्रमुखाः विषयाः।

हाड़ौती – लोकजीवनम्, सामाजिकस्थितयः, वीरता, प्रेम, भक्ति, ग्रामीणप्रसंगाः च विषयवस्तुनि।

**भाषा सौंदर्यम्**

संस्कृतम् – अलंकारयुक्तं, छन्दोबद्धं, व्याकरणशुद्धं च भवति।

हाड़ौती – सरलप्राकृतगुणयुक्तं, लोकबोलीयुक्तं, लयबद्धं गीतप्रधानं च।

**प्रयोजनम्**

संस्कृतसाहित्यस्य – धार्मिक, दार्शनिक, शैक्षिकप्रसारः।

हाड़ौतीसाहित्यस्य – जनमानसस्य मनोरञ्जनं, सांस्कृतिकसंवेदनां प्रसारणं च।

**शैलीभेदः**

| विशेषता | संस्कृतसाहित्ये | हाड़ौतीसाहित्ये |
| --- | --- | --- |
| लेखनरूपम् | छन्दोबद्धं, नियमबद्धम् | लोकशैलीयुक्तं, लयात्मकम् |
| प्रमुखवाङ्मयप्रकारः | काव्यम्, नाटकं, शास्त्रम् | गीतम्, ख्याल्, लोककथा, वीरकाव्यं |
| रसप्रधानता | श्रृंगार, करुण, वीर, शांत | वीर, भक्ति, हास्य, लोकजीवनानुरागः |

हाड़ौतीभाषा सरलतया ग्राह्या अस्ति। अस्याम् आत्मीयता, लोकजीवनस्य चित्रणम्, च विद्यमाना अस्ति। जनानां भावनाः, संस्काराः, परंपराः च अस्याः भाषायाः माध्यमेन यथावत् अभिव्यक्ताः भवन्ति।

अस्याः भाषायाः संरक्षणम् आवश्यकम्। अधुनातने काले, यदा अंग्रेजी एवं हिन्दीभाषायाः प्रभावः वर्धते, तदा क्षेत्रीयभाषाः लुप्तिं गच्छन्ति। अतः हाड़ौतीभाषायाः संरक्षणाय प्रयत्नाः आवश्यकाः। विद्यालयेषु पाठ्यक्रमेषु अपि अस्याः स्थाने स्थानं दातव्यम्।

हाड़ौतीभाषा संस्कृतभाषायाः एकं जीवत्सन्तानम् इव दृश्यते। संस्कृतस्य गौरवं, शब्दसंपदा, व्याकरणं च अस्यां भाषायामपि अंशतः दृश्यन्ते। एषा भाषा न केवलं संवादस्य माध्यमम्, अपि तु एकं सांस्कृतिकं धरोहरम् अपि अस्ति।

**निष्कर्षः**

हाड़ौतीभाषायां संस्कृतभाषायाः प्रभावः केवलं शाब्दिकरूपेण नास्ति, अपितु व्याकरणरचनायाम्, वाक्यसंविधानम्, सांस्कृतिकप्रसङ्गेषु च गम्भीरतया विद्यमानः अस्ति। अयं प्रभावः भाषायाः प्राचीनता, परम्परा, च संस्कृतिनिष्ठतायाम् एकं साक्ष्यम् ददाति।